५८६८

Shri Raghunatha Temple MSS. Library,
JAMMU

No. १३१८ / क

Title वामदेव कवचम् (विश्वमंगलं नाम)

Author

Extent ५ पत्र Age

Subject तन्त्र

वामदेवकवचम्

नं: १३१५

नं० २५२ २६६

नं. १३०४ के
वामदेवकवच
सु

S776

S776

F—S

वामदेवकवचं
विघ्नमंगलंनाम

Complete



वा· ॐ श्री देव्यै सदा सुफलदायिन्यै नमः श्रीभैरव उ
क· वाच अथ वक्ष्यामि देवेशि कवचं मन्त्रगर्भकं मूल
१ मन्त्रस्वरूपं च विश्वमंगलकाभिधं सर्वसंपत्प्र
दं चैव वामदेवस्य पार्वति गुह्याद्गुह्यं परमं
मूलविद्यामयं ध्रुवं परमार्थप्रदं नित्यं भोगमोक्षै
ककारणं महाभयहरं देवि महैश्वर्यप्रदं शिवे
कवचस्यास्य देवेशि ऋषिर्भैरव ईश्वरिजः अनुष्टु

श्छंद इत्युक्तं वामदेवश्च देवता ह्रौं बीजं पराश
क्तिः तारं कीलकमीरितं धर्मार्थकाममोक्षार्थवि
नियोग इतीरितः अस्य श्रीवामदेवकवचस्य भै
रव ऋषिः अनुष्टुप्छंदः श्रीवामदेवो देवता ह्रौं बी
जं पराशक्तिः तारं कीलकं धर्मार्थकाममोक्षार्थे
कवचपाठे विनियोगः भैरव ऋषये नमः शिरसि अ
नुष्टुप्छन्दसे नमः मुखे श्रीवामदेवदेवतायै नमो

वा॰ स्यदि इंह्रोबीजायनमो गुह्ये पराषाक्तयेनमः पाद
क॰ योः नारंकीलकायनमः नाभौ कवचपाठेविनियोः
२ सर्वांगे अथध्यानं वराक्षमालाभयदक्रहस्तःसरो
2 जकिंजल्कसमानवर्णः त्रिलोचनश्चारुचन्द्रमुखो
मांपायाद्उदीच्यांदिशिवामदेवः ॐवांशिरःपातुमे
देवोललाटंह्रींसदाममवामदेवःप्रदेशांमेबीजरू
यस्वरूपिणं ह्रुंपातुलोचनठंठंमुखंह्रींबीजरू

पितं ह्रींकारकोकंठदेशंह्रींपातुस्कंदयोर्मम वा
मदेवोसदापातुभुजौसव्येतरौमम ह्रींकारोहृद
यंपातुह्रींसव्याङ्गदरंमम ह्रींनाभौपातुसततंदे
वोह्रींकाररूपकः श्वाम्नेलिंगदेशंचह्रींरक्षेतु
ददेशाके चंद्रवीजंपातुपादौनमःपादतलंमम
दशानरः पातुनित्यंसर्वांगंममसर्वदा श्रंतर्वहि
श्चमांपातुवामदेवश्चभैरवः भगलिंगामृतापीता

वा· सर्वसंधिषु रक्षन्तु शंकरो मां सदा पातु ममेंद्रियस
क· मानकं शिवो ममेंद्रियार्थेषु रक्षयेदखिलेष्वपि
३ वामदेवः पश्चिमेव्याद्दक्षिणे देववदनकः भगलिंगा
3 मृतप्रीतो भगलिंगस्वरूपकः उदीच्यां मूर्धगः पातु
पूर्वे संहारभैरवः दिगंबरः श्मशानस्थः पातु दिक्षु
विदिक्षु च घोररावाट्टाट्टहासो मे शिवोत्वं स्वप्नोभितः
पातु विघ्नेषु घोरेषु जगड्डधिरभक्षकः करालवदनो

चोरः प्रेतकोलाहलप्रियः मुक्तकेशः सुकेशश्च म
दिरोन्मत्तभैरवः देवदत्तोमहोग्रश्च सदापूमशानगः
परः शिरसः पाददर्यन्तं देवत्तोवतात्सदा इतीदंक
वचंदिव्यं साधकानां सुदुर्लभं मंत्रसिद्धिकरंसाक्षा
न्महादेवस्यभाषितं इदंकवचमज्ञात्वायोजपे
द्धामदेवकः प्रातलक्षप्रजप्तोपितस्यदेवोनसिद्ध
ते सप्तास्त्रघातमाप्नोति सो चिरान्मृत्युमाप्नुयात्

वा· मंत्रेण म्रियते योगी रक्षयेत् कवचं परं त्रिसंध्यं पठना
क· दस्य कवचस्य तु पार्वति सिद्धियोष्टौ करे तस्य महे
ष श्वाइव वापरः रूपेण स्मरतुल्या सौकामिनीनां प्रि
४ योभवेत् तस्मादेतत्तु कवचं न देयं यस्य कस्यचित्
भक्तियुक्ताय शांताय दानशीलाय धीमते यो ददा
ति तु शिष्येभ्यस्तस्य वध्यं जगद्भवेत् गुह्याद्गुह्यत
रं गुह्यं महारुद्रेण भाषितं यस्य कंठगतं तस्य कर

स्याःसर्वसिद्धयः श्रीविश्वमंगलंनामकवचंनप्र
काशयेत् रहस्यातिरहस्यंचगोपनीयंस्वयोनिव
त् इतिश्रीरुद्रयामलेतंत्रेश्रीविश्वमंगलंनाम
वामदेवकवचंसंपूर्णम् ॥